# पञ्चमोऽध्यायः
# (समीक्षात्मकः)

# पञ्चमोऽध्यायः

## (समीक्षात्मकः)

1. वेदादारभ्य अद्यावधि पर्यन्तम् ज्यौतिषस्वरूपम्।

2. कर्मकाण्डस्य उपयोगिता महत्त्वम् च

3. ज्यौतिषकर्मकाण्डयोः सम्बन्धः।

4. पुराणेषु उभयोः वैशिष्ट्यम्।

# 1 वेदादारभ्य अद्यावधि पर्यन्तम् ज्यौतिषस्वरूपम्

संस्कृतजगति वेदानां वैशिष्ट्यं महत्वं च वरीवर्त्ति भारतीय संस्कृते यानिकानि कर्माणि सन्ति तत्कर्मणां वर्णनं उपजीव्यरूपणे वेदेषु निहितं अस्ति। शास्त्राणानामपि रहस्यं तत्रैव प्राप्यते। तर्हि ज्योतिषशास्त्रस्य स्वरूपं वेदतः आरभ्य पुराणेषु विविधरूपेण प्राप्यते। अत्र वेदारभ्य अद्यावधि ज्योतिषस्य स्वरूपं किमसित अस्य विवेचनं उपस्थाप्यते।

वेदेषु ज्योतिषस्य स्वरूपं एतादृशं अस्ति- चतुर्षु वेदेषु प्रायेण ऋग्वेदे, अथर्ववेदे च ज्योतिषसंबंधी वर्णनं उपलभ्यते। तत्र खगोलशास्त्रस्य (Astrology) विस्तरेण प्राप्यते। यथा --

1. नक्षत्रज्ञानम्।
2. संवत्सरविवेचनम्।
3. ग्रहादिवर्णनम् च दरीदृश्यते।

ऋग्वेदस्य[1] दशममण्डलेसप्तममण्डले च तथैव अथर्वसंहितायां नक्षत्राणाम् वर्णनं ब्राह्मणग्रन्थेष्वपि प्राप्यते।

तैत्तरीयसंहितायां नक्षत्रविषये यद्विवेचनं उपलभ्यते तत्र नक्षत्रदेवतादीनां, लिङ्गवचनादिकम् च उपलभ्यते।

---

1.ऋग्वेद

वेदानन्तरम् पुराणेषु ज्योतिषस्य स्वरूपं अधिकं विस्तृतरूपेण दृश्यते। पुराणेषु प्रायेण ---

1. अग्निपुराणे
2. श्रीमदभागवते।
3. स्कन्धपुराणे।
4. वायुपुराणे।
5. विष्णुपुराणे च ज्योतिषस्य त्रिविधं रूपं विद्यते।

तत्र संहिता ज्योतिषस्य, फलितज्योतिषस्य च विस्तारः वर्णिताः सन्ति। पुराणानामेव आधारीकृत्यैव अन्येषां ग्रन्थाणाम् प्रादुरभावः अभवत् यद् वर्णनम् पुराणेष ज्योतिषस्य दृश्येत तदेव अन्येषु ग्रन्थेषु वर्णितमस्ति। यथा --

1. ग्रहाणांस्वरूपम्।
2. ग्रहाणाम्कार्यम्।
3. शुभाशुभफलकथनम्।
4. मुर्हूतज्ञानम्।
5. पञ्चागादिनिदर्शनम्।

इत्यादि पुराणकाले यथा उपलभ्यते तथैव अन्येषु ग्रन्थेषु च दृश्यते। ततः महाभारतोपरान्ते ज्योतिषस्य स्वरूपं समाजे अधिकम् विस्तृतं जातम्। यथा -- ग्रहगणितानां वर्णनम् स्वातंत्र्येण अभवत् अनेकैः

ज्योतिषविद्वदभि: पुराणानाम् आधरीकृत्य प्रतिविषयं स्वीकृत्य वर्णनं कृतम्। यथा --

1. सूर्यसिद्धान्त:
2. वराहसिद्धान्त:।
3. मुर्हूतमार्तण्ड:।
4. शकुनविचार:।
5. स्वप्नफलकथनम्।
6. ग्रहाणाम् प्रभाव:।
7. ग्रहदोषादिनिवारणम्।
8. जन्मपत्रिका निर्माणम्।
9. वर्षफलकथनम्।
10. दशादिविचार:।

इत्येषां विषयाणाम् विशेषविवेचनम् पुराणोत्तरकाले जातम्।

सारांशत: एवं कथयितुं शक्यते ज्योतिषस्य साम्प्रतिकं स्वरूपं यद् वर्तते तत् स्वरूपं पुराणानाम् प्रभावेणैव जातम्। दशमीशताब्दीत: ज्योतिषस्य अनेकविधरूपेण प्रचार:-प्रसारश्च समाजे जात:। तेन कारणेन ज्योतिषशास्त्रस्य विविधेषु संदर्भेषु अनेकानि पुस्तकानि समुद्भूतानि अद्यत्वे ज्योतिषस्य यद् स्वरूपं प्राप्यते तत् स्वरूपं पुराणामनेव आधारभूतं अस्ति। अतएव वेदादारभ्य ब्राह्मणग्रन्थेषु, स्मृतिग्रन्थेषु, पुराणेषु

ततः पौरोहित्यविषयं समाश्रित्य ज्योतिषस्य विस्तृतं स्वरूपं जातम्। पूर्वम् तु वास्तु विषयः अपि ज्योतिषस्यान्तर्गतमेवासीत्। ततः पञ्चसहस्रवर्षाणिपूर्वम् महाभारत कालोपरान्ते स्वातन्त्र्येण वास्तुशास्त्रस्य अपि प्रादुरर्भावः जातः। तथैव शकुन स्वप्नशास्त्रादीनाम् स्वतन्त्ररूपेण ग्रन्थानाम् आविर्भावः अभूत्। समासेन निष्कर्षः अस्ति यत् भारतदेशे पुराणानाम् महत्वम् अधिकं वर्तते तेन कारणेन ज्योतिषस्य व्यावहारिकं स्वरूपं अपि अद्यत्वे प्रस्फुटितं भिन्न-भिन्न विषयाणाम् विचारः ज्योतिषे समादृताः भवन्ति। ग्रहगोचरत्वादीनाम् महत्त्वम् वर्णनम् व साम्प्रतिके युगे बाहुल्येन प्रचाल्यते इति।

## 2. कर्मकाण्डस्य उपयोगिता महत्वम्ञ्च

अस्मिन् देशे पौरोहित्यकर्म वैदिककालतः प्रचलति। जन्मतः मृत्युपर्यन्तम् कर्मकाण्डस्य पौरोहित्यस्य वा संगतिः संगच्छति। भारतदेशे मनुष्यस्य प्रतिकर्म अस्यैव आधारः स्वीक्रियते। ज्योतिषशास्त्रस्य यद्निष्ठम् दृश्यते तस्य शमनोपायः कर्मकाण्डद्वारा एव स्वीक्रियन्ते यथा ग्रहशान्तिः जन्मविषयकम् यद्यपि दुष्कृतम् तदपि कर्मकाण्डद्वारैव शाम्यति। स्मृतिग्रन्थानाम् निर्देशानुसारेण षोडशसंस्काराणां विधिः क्रियते। अनेन स्पष्टीभवति यत् कर्मकाण्डस्य का उपयोगिता अस्य उपयोगित्वम् सिद्धयति। मानवानां चतुर्विध पुरुषार्थ प्राप्त्यर्थम् प्रथमेहि धर्मः वर्तते। धर्मस्य कोऽपि विधिः यदा स्वीक्रियते तदा श्रौतग्रन्थस्य द्वारा, पौराणिकग्रन्थद्वारा च विधीयते। एतदेव अस्य कर्मणः महतवम्। अत्र कर्मकाण्डस्य उपयोगिता विषये प्रस्तूयते ---

1. षोडशसंस्काराः।
2. दोषपरिहाराय।
3. ग्रहदोषनिवारणम्।
4. रोगनिवृत्यर्थम्।
5. कर्मकाण्डस्य महत्त्वम्।

**षोडशसंस्कारा: --**

गर्भाधानसंस्कारादारभ्य अन्त्येष्टि पर्यन्तम् या विधि: उपयुज्यते सोविधि: वैदिकरीत्या संस्क्रीयते। अत्र कर्मकाण्डस्य उपयोगिता सिद्धयति।तद्यथा ----

1. गर्भाधानसंस्कार:।
2. पुंसवनसंस्कार:।
3. सीमन्तोन्नयनसंस्कार:।
4. जातकर्मसंस्कार:।
5. नामकरणसंस्कार:।
6. निष्क्रमणसंस्कार:।
7. अन्नप्राशनसंस्कार:।
8. चूड़ाकरणसंस्कार:।
9. उपनयनसंस्कार:।
10. चत्वारिवेदव्रत ऋग्वेद:।
11. यजुर्वद:।
12. सामवेद:।
13. अर्थर्ववेद:।
14. समावतर्नसंस्कार:।
15. केशान्तसंस्कार:।
16. विवाहसंस्कार:।

**दोषपरिहाराय :---**

मानवजीवने यानि विविधानि दूषणानि च आगचछन्ति तद्दोषाणां निवृत्यर्थम् विविधा: सपर्या: क्रीयन्ते तदपि कर्मकाण्डस्यैव आधारेणैव विधीयते।

**ग्रहदोषनिवारणम् :---**

ज्योतिषशास्त्रस्याधारेण प्रतिमनुष्यस्य जीवने नवग्रहाणाम् प्रभाव: भवति यदा ग्रहाणां शुभदृष्टि: भवति तदा किमपि नैव क्रियते जनै: किन्तु यदा ग्रहाणां अशुभफलं भवति तदा अस्योपयोगिता दृश्यते। कर्मकाण्डग्रन्थेषु ग्रहशान्ति: विविधरूपेण क्रियते।

**रोगनिवृत्यर्थम् :---**

'शरीरंव्याधिमन्त्रम्' इतिरीत्या सर्वेषाम् जनानां विविधारोगा: जायन्ते। तद्रोगाणां निवारणाय कर्मकाण्डद्वारा विधि: क्रियते अत्रैव अस्योपयोगिता सिद्धयति।

**कर्मकाण्डस्य महत्त्वम् :---**

कर्मकाण्डस्य महत्त्वम् पूर्वकालत: एव अस्ति अस्य प्रयोग: पर्यावरण सन्दर्भेऽपि उपयुज्यते। यथा-विविधयज्ञादिनाम् आयोजनम् प्राचीनकालत: क्रियते यदा पर्जन्यादिज्ञानम् प्रकोप: अजायत् तत्शान्त्यर्थम् अपि विविध यज्ञादीनाम् समायोजनम् अभूत। तथैव यदा वर्षाकालेऽपि वर्षा न जायते तदाऽपि पर्जन्य यज्ञ: समायोज्यते। तेन कारणेन पर्यावरणस्य सम्यक् रक्षणाय अपि यज्ञम् क्रियते स्म्। तदवदेव अन्येषाम्

यज्ञानां विधिः सम्पन्नः क्रियते स्म। कर्मकाण्डस्य विविधेषु क्षेत्रेषु उपयोगिता प्राक्कालतः अद्यावधिः स्वीक्रियते।

# 3. ज्यौतिष कर्मकाण्डयोः सम्बन्धः

वेद प्रतिवाद्य विषयः यदा लिख्यते तदा प्रश्नः उदेति कः खलु वेदानां अविषयाः। यतोहि वेदेषु सर्वम् उपलभ्यते वेदानमेवं उपब्रह्मणम् पुराणम् इति। वैदिकसाहित्ये पुराणानां अतीव गौरावस्पद सथानं वर्तते। अनेन कारणेन महाभारते कथितम् ---

इतिहासपुराणाभ्यां वेदं समुपबृंह्येत्।
विभेत्यरभ्यश्रुतात्वेदो मामयं प्रहरिष्यति।।[1]

वेदार्थ तत्वं अवबोधनाय पुराणानां आविर्भावः। कालान्तरे महर्षि व्यासेन अनेकानि पुराणानि उपपुराणानि च रचितानि। पुराणेषु अपि अनेके विषयाः वर्णिताः सन्ति। विषयेऽस्मिन् अत्र समासेन उल्लिख्यते। किन्तु ज्योतिषकर्मकाणयोःसंबंधः केन कारणेन कथं च वर्तते अत्र प्रस्तूयते ---

कर्मकाण्डविषयः वैदिकसाहित्ये प्राचुर्येण प्राप्यते। विशेषेण शुक्लयुजुर्वेदे। तत्र पञ्चदशशाखासु वर्णनं कर्मकाण्डस्य अस्ति। कर्मकाण्डस्य प्रयोजनं इदमेव अस्ति यत् ज्योतिषशास्त्रदृष्ट्या यानि अरिष्टानि संति तेषां अरिष्टानां शमनाय कर्मकाण्डस्य उपयोगिता सिद्धयति। ज्योतिषस्य कर्मकाण्डस्य च कः संबंधः कीदृशश्च इत्यत्र सोदाहरणं लिख्यते।

---

1.महाभारतम्

**कर्मकाण्डविषयः ---**

मानवसमाजे अनेके विषयाः तत् उन्नयाय समीक्षिता यथा ---

1.वर्णाश्रमव्यवस्था।

2.विविधा:संस्कारा:।

3.गार्हस्थजीवने नित्यनैमित्तकानि प्रर्याश्चित्तानि कर्माणि यानि सन्ति तेषां शास्त्रोचित विधिद्वारा प्रपूरणाय या क्रिया स्वीक्रियते सैव कर्मकाण्डविधिः कथ्यते। तत्रापि अनेक विधयः यज्ञाः तत्र भवन्ति। कर्मकाण्डानुरोधेन ---

1.दशपूर्णमासः

2.पितृयज्ञः

3.चातुर्मासियष्टिः

4.राजसूयः

5.सोमयागः

6.वाजपेयः

7.अग्निपयनं

8.शतरुद्रियम्

9.वसोधारा इत्यादयाः विषयाः कर्मकाण्डस्य।

शक्तिशाली पुरुषः प्रेयः, श्रेयश्च साधयतिुं कर्मकाण्डद्वारा कार्यम् करोति। येषां विषयाणां कदा कथम् सम्पन्नः कुर्यात् अस्य समाधानं

ज्योतिषे वर्तते। किन्तु एतदपूर्वम् ज्योतिषशास्त्रस्य ये प्रधान विषया: संति तेषां अपि ज्ञानं अपेक्षते।

**ज्योतिषस्यविषया: ---**

वेदाङ्गेषु ज्योतिषशास्त्रं नितरां महत्वम् आवह्यति। ज्योतिषं नाम कालविधान शास्त्रम्। एवं कालानुपूर्वा: विहिताश्च यज्ञा: तस्मात् कालविधान शास्त्रं कथ्यते। समुर्हूतम् अनुरुध्य क्रियमाणा:, यज्ञ-यज्ञादि क्रियाविशेषा: फलाया कल्प्यन्ते। न तु यदृच्छ्य सम्पाद्यमाना:। याज्ञवल्क्य महर्षिभि: प्रकटितं। वेद चतुष्टयस्य प्रतिवेदं भिन्नं ज्योतिषं वर्तते। ज्योतिषं तु वेदस्य अङ्गम् वर्तते। तथैव कर्मकाण्डम् अपि वेदस्य कल्पसूत्रस्य आभ्यान्तरे भूतत्वात् हस्तरूपेण स्वीक्रियते अनयो: अङ्गयो: कोसंबंध: अत्र उदाहरणेन् प्रस्तूयते--

**उदाहरणम् :---**

यस्य कस्यापि जनस्य जन्म: भवति तदा धर्मशास्त्रदृष्ट्या तस्य जातकर्मादि संस्कारा: क्रियते। किन्तु जातकर्म संस्कारा: कथं भवति अस्य समाधानं स्मृतय:, धर्मशास्त्रीय ग्रंथक्रियते। किन्तु कदा कर्तम् शक्यते अस्य निर्णय: ज्योतिषशास्त्रम् करोति उभयो: संबंधयो: एतत् क्रिया सम्पन्ना भवति।

अनेन उदाहरणेन ज्ञातु शक्यते यत् उभयो: शास्त्रयो: परस्परं अन्योन्याश्रय संबंध: वर्तते। कल्पसूत्रेषु श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम् च भवन्ति।

सूत्रग्रन्थेषु वेद–विहित–श्रुति प्रतिपादित–यज्ञयज्ञादि विधान तद्विवरणं प्रतिपादका: ग्रन्था: अत्र श्रौतसूत्रेषु चतुर्वर्विधा: क्रिया: भवन्ति। एता: क्रिया: कर्मकाण्डीय दृष्ट्या समपत्स्यते।

गृह्यसूत्रेषु ग्रहस्थानदीनाम् संस्कारा: क्रियन्ते तथैव धर्मसूत्रेषु लौकिक आचार–व्यवहार धर्म प्रतिपादितानि सूत्राणि सन्ति।

सूत्रग्रन्थे विविधा: विषया: अन्येऽपि सन्ति। किन्तु कर्मकाण्डक्षेत्रे वैदिक क्रियाकलापं पौराणिक–क्रियाकलापं च समादितं भवति।

यदा ज्योतिषस्य विषया: अधीयन्ते तदा स्पष्टं भवति यत् सिद्धान्त

1.संहिता

2.होरारूपम्

3.स्कन्धत्रयात्मकं अध्ययनं क्रियते। कालान्तरे शकुनशास्त्रं सामुद्रिकशास्त्रं, स्वप्नशास्त्रं च ज्योतिषे अन्तर्भूतम् जातम्। अस्य शास्त्रस्य प्रधानत्वेन गणितशास्त्रम् अपि कथ्यते।

गणितशास्त्रे अंकगणितं, बीजगणितं च द्वयमपि गृहविज्ञानस्य अङ्गभूतं परिगण्यते। गृह्यतन्त्रे आर्यभट: ब्रह्मगुप्त: भास्कराचार्यश्च इति प्रसिद्धा:। बीजगणिते अपि एते विषय: संन्ति यत् यज्ञ वर्णनं वेदि निर्माण प्रकार: ज्यामिति: इति सन्ति यत् यज्ञवेदि निर्माण प्रकार: ज्यामिति: इति यस्य वर्णनं शुल्बसूत्रेषु प्राप्यते सोऽयं गणितशास्त्रं प्रपञ्च: वेदाङ्गभूत: वर्तते।

**उभयोः संबंधः ---**

वेदपुरुषस्य एकं शरीरं परिकल्प्यते। वेदानां सम्यक् अवबोधनाय वेदाङ्गानि प्रवृत्तानि तानि च इमानि सन्ति।

1. शिक्षा
2. कल्प
3. व्याकरणम्
4. निरुक्तम्
5. छन्दः
6. ज्योतिषम् च इति षडाङ्गानि सन्ति।

वेदाङ्गानां ज्ञानं अन्तरवेदार्थः न शक्यः। एतेषु षटसु अङ्गेषु अत्र द्वयोः अङ्गयोःकल्पसूत्रे ज्योतिषम् इतयनयोः संबंधः विविच्यते। वेदरूपी शरीरस्य इमानिअंगानि सन्ति।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुनिरुक्तं श्रोतमुच्यते।।

शिक्षा प्राणस्तु वेदस्य मुखं तु व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीरयैव ब्रह्मलोके महीयते।।[1]

एतद् आधारीकृत्य ज्योतिषं नेत्रं कर्मकाण्डं (कल्पसूत्रं) हस्तौ वर्तते। यदा अस्माकं शरीरे याः क्रियाः भवन्ति तत् सर्वम् हस्ताभ्यां पूर्णम् जायते किन्तु यदि नेत्रं नस्यात् तदा कथं क्रिया कर्तम् शक्यते अतएव योसम्बन्धः हस्तयोः नेत्रयोश्च मध्ये अस्ति सैव संबंधः ज्योतिष

कर्मकाण्डयोः अस्ति। यतोहि कथ्यते कर्मकाण्ड विधि प्रतिपादिकाः ग्रन्थाः कल्पसूत्रे समर्थयते यज्ञंयाज्ञादि प्रयोगाः यत्र तत्र कल्पं इति। अतः ज्योतिषशास्त्र कर्मकाण्डयो अन्योन्यश्रय संबंधः सिद्धयति इति।

# 4.पुराणेषु उभयोः वैशिष्ट्यम्

पुराणानां महत्त्वम् पूर्णउल्लिखतम। पुराणानापि इतिहासरूपेण स्वीक्रियते इति। हास्य द्वयोः गतिः --

1. परिक्रिया।
2. पुराणकल्पः।

अत्र परिक्रिया एकनायका भवति।

पुराणकल्पाः बहुनायकाः भवन्ति।

इतिहास पुराणयोः एतावदेव अन्तरं भवति यत् प्राचीनाख्यायिका सूचकः तद्विपरीततम् सृष्टि प्रक्रिया वर्णनं पुराणं इति। तत्रापि काल्पनिक कथा सम्बलिताः तत्र प्रतिपाद्य विषयस्य तु सुदीर्घः सूची संजायते। अत्र एषु पुराणेष कर्मकाण्ड विषयः ज्योतिष विषयश्च अस्ति तस्य समासेन विवेचनं कृत्वा उभयोः किम् वैशिष्ट्यं इति लिख्यते।

**कर्मकाण्डस्य विवेचनम् :---**

कर्मकाण्डस्य विवेचनम् अधोलिखित ग्रन्थेषु प्राप्यते। यथा --

1. अग्निपुराणम्।
2. मत्स्यपुराणम्।
3. मार्कण्डेयपुराणम्।
4. श्रीमद्भागवतम्।
5. पद्मपुराणम्।
6. गरुणपुराणम्।
7. लिङ्गपुराणम्।

8. वाराहपुराणम्।

9. भविष्यपुराणम्।

**1.अग्निपुराणम् :---**

अस्मिन्पुराणे ज्यौतिषस्यविभिन्नङ्गानि चर्चा विद्यते।

**मत्स्यपुराणम् :---**

अत्र श्राद्धकल्पा, संस्कारविवेचनं अवतारकथा तत्र ज्ञा माहात्म्य, मदनद्वादशी माहात्म्यम् इत्याइकम् वर्णनम् प्राप्यते।

**मार्कण्डेयपुराणम् :---**

अस्मिन् पुराणे महर्षि मार्कण्डेन जन्ममरणादि निरूपणम् वर्णाश्रमोधर्मोपदेश:, श्राद्धकल्प, सदाचार इत्यादीनाम् विवेचनम् उपलभ्यते।

**श्रीमद्भागवतम् :---**

अस्मिन् महापुराणे प्रायेण सर्वविषया: प्रकटिता। कर्मकाण्डदृष्ट्या दशमस्कन्धे अतीव विस्तरेण विवेचनं उपलभ्यते। तत्रैव षोडश संस्कारा: वर्णाश्रमादिनाम् धर्म कथमपि उपलभ्यते।

**पद्मपुराणम् :---**

अत्र राधाकृष्णयो: विवाहवर्णनं, शाकुन्तलादि वर्णनं वर्तते।

**स्कन्धपुराणम् :---**

अस्मिन् पुराणे सर्वेषु खण्डेषु भारतवर्षस्य स्थितानां तीर्थानां सुविपुलं वर्णनम् प्राप्यते।

**गरुड़पुराणम् :---**

अस्मिन् पुराणे खण्डद्वयं पूर्वार्धे अनेके विषयाः उत्तरार्धे च प्रेत्कल्पः और्ध्वदैहिककर्माणि सुश्रृद्धम् श्रूयते।

**लिङ्गपुराणम् :---**

अस्मिन् पुराणेशिवस्य अष्टाविंशति अवतार शिवलिंगस्य विशेषरूपेण शिवार्चनं उपलभ्यते।

**वाराहपुराणम् :---**

अत्र प्रामाणिकं भौगोलिक वर्णनं उपलभ्यते। तथैव ज्योतिषशास्त्रस्यपि पुराणेषु वैशिष्ट्यं उपलभ्यते। प्रथमेहि अग्निपुराणे ज्योतिषस्य परिभाषा, तस्यमहत्वम्, तत्त्स्वरूपम् च उपलभ्यते। अस्य पुराणस्य ज्योतिषविषयकाः अनेके अध्यायाः सन्ति। आहात्य पच्चदश अध्यायाः ज्योतिषस्ये वर्णनं प्राप्यते।

तथैव संवतसरविवेचनं, नक्षत्रविद्यावर्णनं, अपि अस्मिन् पुराणे प्राप्यते। यत्र अन्येषु पुराणेषु च अस्य ज्योतिषस्य वर्णनं उपलभ्यते।

**भविष्यपुराणम् :---**

असिमन् पुराणे कर्मकाण्डस्य विवेचनं तु प्राप्यते एव तथापि ज्योतिषशास्त्रस्य अनेके विषयाः अत्र समाहिता भवन्ति। पुराणानाम् न केवलं धार्मिकदृष्ट्या अपि तु ऐतिहासिकदृष्ट्या, भौगोलिकदृष्ट्या, सामाजिकदृष्ट्या, शास्त्रीयदृष्ट्याऽपि अपरिहार्यम् लक्ष्यते। यथा -- विष्णुपुराणम्, मत्स्यपुराणम्, श्रीमद्भागवतम् च। एतेषु पुराणेषु तात्कालिकं भौगोलिकं खगोलविद्याश्च वर्णनम् प्राप्यते।